This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(अं ८८)

॥श्रीरामकृष्णीनामस्मरणमीमांसारंभः॥

Acc. No. ~~37J~~ M-1626
Title - नामस्मरणमीमांसा.
Author - रामकृष्ण (संवत् 18...2)(?)
Date - ?
Subject - भक्ति इ.
Folio - 6
Xerox - 12.

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1626
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥श्रीकालभैरवंनत्वातथायोगीश्वरीमपि नामस्मरणमीमांसाग्रन्थोनरच्यते १
शिष्टाःसदाभालिकाभिर्नामस्मरणतत्पराः दृश्यंतेबहवोलोकेशास्त्रसिद्धंनवेतितत् २ एवंवि
प्रतिपन्नानांनिर्णयार्थंमयाधुना संक्षिप्यन्निरव्यतेकिंचिन्नानाशास्त्रार्थचिंतनैः ३ वेदशास्त्रपु
राणकर्मादिभ्योनामस्मरणस्याधिकत्वंजागरूकमस्तीतिपदार्थस्थितिः तत्प्रतिपादिका श्रु
तिरुक्त मर्त्तोअमर्त्तस्यतेभूरिनाममनामहे·विश्वासोजातवेदसः· वेदोत्पादकस्यशास्त्रयो
नेरग्निरूपस्य·ते·तव·नाम·आरव्यं·भूरि·सर्वतः·अधिकं·उत्कृष्टंयथास्यात्तथा·मना
महे·मन्यामहे·इतिश्रुतिपदानामन्वितार्थः शास्त्रयोनित्वाद्वेदादुत्कर्षः शास्त्रादौसर्वे
नीमस्मरणमेवमंगलंरचितमस्तीतिशास्त्रादुत्कर्षः पुराणेषुत्तन्महिमैवसर्वत्रोक्तइति
यावत्पुराणादुत्कर्षः सर्वकर्मतिसाकल्यापादनायस्मृत्येत्यभिहितमितियावत्क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मीभ्यः उत्कटत्वम् तदेतत्सर्वमभिप्रेत्योक्तम् प्रायेणवेदतदिदंनमहाजनोयमित्यादि महाजनोमन्वादि
रित्यर्थः एवंसतिवेदशास्त्रपुराणधर्मकर्मारंभवदधिकशुचितानियमसंपन्नावेवतत्प्राप्नोति·ना
न्यस्याऽशुचितायाम् लौकिकेभोजनेसदसिरथ्यादौयानेशयनेवा·सवस्त्रादिनाऽनियमेननिषे
धातिदेशात्तु·मंत्रवदिति कर्मसनियमशुचितारियुक्तः वेदबोधितकर्त्तव्यताकत्वात्·संध्यादि
वत्·व्यतिरेके·घृतादिवदित्यनुमानादिभिस्तत्कर्त्तरिशिष्टत्वभ्रांतिरेवसिद्धा इत्थंचसर्वैस्मार्त्त
दातव्यानैवकर्त्तव्यमित्यागताविप्रतिपत्तिः तत्रेदंप्रतिभाति सर्वैरापामरैः शवनिर्हरणादौरामनाम
स्मरणंक्रीयमाणंप्रतीयते उत·प्रातःपूत्क्रममाणेषुरुद्रस्तारकंब्रह्मव्याचष्टइति अत्रवर्त्तमाने
शानच् अतस्ततोपिकिमशौचम् अवसानेनुखत्वात् ननुनदेवचरितंचरेत्·मनुष्याधिका
रस्थाछास्त्रस्यैतिचेन्नैवम् संभवतिशास्त्रार्थतदनियोज्यताकल्पनायाअन्याय्यत्वात् भव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तिचदेहावसानेरुद्रास्यदेवादेहधर्मैरतिमलिनतापन्नतयाऽत्यशेचस्यस्वतोनामस्मृतिः
कार्या अन्यैर्वातत्रत्यैः कारयितव्येतिविधियुक्तम् नन्वेवंसति॰अर्चनेहास्यभाष्यादौछिद्का
यांक्षुद्विजृंभणे कामेक्रोधेकुशस्तेवावराहोक्तानुनिष्क्रान्तिरित्यादिवाक्यानांकागतिः अंग
प्राह्यावंगिन्यतिदेशात् इतिचेन्न यावद्वाचंवाचनिकमितिभंग्यातत्रातिदेशेप्रमाणाभावा
त् नचोक्तयुक्तिरेवमानम् सर्वेषांमूर्खत्वापादनेनसर्वाचाराणामपह्नापपत्तेः नतुभव
तुयत्सिक्षं तदेवास्तु वक्ष्यमाणोत्तरभंग्यासिक्षत्वांशविरहात् वक्ष्यमाणरीत्यैवदर्शितप्र
माणांतरस्यतथात्वानापादनात् सकामत्वोपाधिनादूषितंच प्रत्युतास्माकंसर्वाचारस्यापि
प्रामाण्यग्राहकत्वम् अमुकंकर्मसमूलं परंपरयाप्राक्तनसर्वाचारात् अन्वयेसंध्यादिवत्
व्यतिरेकेघृतादिवदिति परंकचिदवगतेमूलताकचिन्नेतिविशेषः शास्त्रानामानंत्यादुच्छेदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च एवंदर्शितवादितकोपिसाध्यांशस्यहेविध्यात् हेत्वादिशेषान्नतदेकार्थसाधकइत्यूह्यम् ननुविध्य
भावएवनिषेधइतिचेन्नाप्रतीयतेचायंविधिः अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा यःस्मरे
त्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिरिति १ अस्यार्थः देशकालकुलावस्थानाचारद्रव्यासनादिभिर्वि
कलोऽघोपात्तोमुख्यःउद्देश्यतावच्छेदकत्वात् तैरेवसकलोद्वितीयः अत्रप्रायश्चित्तवदत्यंतंशु
चिरित्यन्वयितव्यम् उद्देश्यविधेययोरैक्यान्निष्फलत्वापत्तेः सर्वावस्थांप्राप्तोनाम लौकिकीमि
श्रितावा मिश्रणंच कार्यंवाङ्मनसोपरस्परंविपरीतधर्माक्रांतत्वेनाप्रत्येकोभयधर्मैर्वा लौकिकीतु
भोजनावस्थायाम् यथामहाराजदेशेनामस्मरणाचारः यद्यपि उक्तसहकार्य्यंतरानपेक्षोपि स्म
रेदित्यकार्थकाख्यातः कीर्त्तयेदित्यर्थः नामस्मरणंकुर्यादितियावत् ननुपुंडरीकाक्षंध्यायेदितिमा
नसिकंश्रमितव्यम् प्रथमनिश्रेणिकात्यागेरचनायाःविसंघुलनास्यात् मानाभावाच्च पूर्वोत्तरंसंको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चासंगतेरपीतिबोध्यम् अतएवमुरव्यार्थांतरेणादर्शितव्यवहारश्चागोपालांगनानाम् नोचेत्यदार्थयोःक
थमधिसंग[illegible]खभावात्तज्जलांजलिप्रसक्त्या भ्रांतिकल्पनागौरवापत्तेः द्वारत्वेनसंग
तिकल्पनेतुद्रविडमंडकन्यायादरोलक्षणाकल्पनातोत्यापत्तिरपीत्यायातंमार्गे अतएवकर्म
मात्रांतेविष्णवेनमइतित्रिवारमुच्चारणपूर्विकारक्षानांनामस्मृतिरेव अतश्चैवमन्वादिस्मृतौ
नांज्ञानपूर्वकमुच्चारणंप्रत्यक्षतोऽनुभूयते इतिनामकीर्त्तनमेवपद्यार्थोनध्यानम् वाक्यार्थो
संगतेश्चितिदिक् प्रवर्त्तनाबीजमित्यमाह सःपुरुषःएकपदंवाशुक्लोभवतीत्यंतः अथात्रैवंविचा
र्यमाणेतस्यसार्वकालत्वमप्यर्थात्सिद्ध्यतिभंग्याफलति १ तथाचफलितम् सर्वत्रसर्वकार्येषुअ
मामास्त्वितिनिश्चितम् इतिवेय्यर्थ्यरोधेस्यात्पितृकार्यैककारिणी १ तथाधिकारसंपन्नौनिग
मागमयोर्गमः इतिनादृत्यसंपत्तिरोधेणवस्मृतेःक्षणः २ क्वचित्कदाचित्साहित्यंतूबराधिकृति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यथा प्राशस्त्यबोधनायैवसाऽन्यथानिर्बलाभवेत् ३ वैश्वदेवाधिकरणेनिर्णीतमिदमेवहि होलाका
धिकृतिर्यद्यतःसाबलवत्तरा॥ अतएवसंकेत्यंपरिहास्यंस्तोभं हेलनमप्युक्तम् अजामिलादयाधि
कार्यांचप्रथमोदाहरणेअशुचितासंपत्तिरपि विस्तारिता पारिहास्यस्तोभहेलनानांवापुनःकिं
वा[illegible]व्यम् अतश्चकामंक्रोधमित्यादिनायांतितन्मयतांहितेइत्युक्तम् अत्रार्थांतरंवारिमतो
पोद्बलकं सर्वोपप्लवभीत्यानिरसनीयम् अतःशुचितामात्रेसुतरांकैमुत्यंभागवताभिप्रायेण॥
गीतायांच अपिचेत्सुदुराचारइत्यादिना अंतकालेचमामेवेतिच तदाऽशुचितासमनेय्य
त्यात् एवंवैष्णवादिनानापुराणेषु अशुचितायामेवनामोच्चारणमाहात्म्यंबहुधाद्रष्टव्यम् तथा
वेदमंत्रोक्तम् यज्ञोपवीतग्रहणेआक्षेचतिल्लकेयथा अन्योन्याश्रयणप्राप्तोकर्त्तव्यंकिंतथाभवेत्-
१ नामस्मरणंद्विविधम् मंत्रमालाभेदात् आद्येशुचितापेक्षा नान्यत्रापरिभाषातिरेकेणआक्षेस्याद्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्तनायथानित्येतद्दृष्टान्तेपिपरिभाषाद्वयेनचेत् १ आत्माशुद्धेरपेक्षातोदेहाशुद्धिस्तुकाभवेत् असंभवग्र
स्तमपिशुद्धिः किंचिदपेक्षणात् २ इदंपरंविवेक्तव्यंसर्वकर्मस्वियंगतिः अपेक्षामनपेक्ष्यैवउत्कर्षःतत्स्म
तेरिति ४ अत्रायंभावः यथासर्वांगांगोदकीक्रियाइत्यादिनाप्राणांनेपितदितरास्पर्शनियमेनतत्संबं
धिदैहिकक्रियादोषवचनानामनवसरोस्ति परित्यापवादमुत्सर्गाःप्रवर्त्तंतेइतिन्यायात् यथा
वाअंतर्गृहेदैहिकक्रियाया:सप्रायश्चित्तबलवत्तरदोषश्रवणेपितत्रत्यमहाफलवत्तयाब्रह्म
पुरीदानाभिधानेनपात्रीयदैहिकक्रियाजनितदोषकदंबभाक्त्वंनयजमानस्येत्फन्नीयते प्रा
प्तीतिसत्यम् समनेष्यत्पात् परंतुविशेषविधिनासामान्यशास्त्रस्यबाधात् पूर्ववदर्थिकापवा
दात् तथाहि सर्वहिंसानिषेधाग्नीषोमीययोर्यथांतरंतरेलोवसामान्यस्यापिविशेषतयावाक्या
र्थःसंपद्यते सव्येतरगोविषाणवत्तुल्यबलयोर्विरुद्धविधोस्परस्परंबाधायोगात् अन्यथाप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माण्यापत्तेरितिभावः एवमेवात्रहृल्लेखाःशरीरेबहवोद्रष्टव्याः इत्थंचप्रकृतेऽवंध्यकालनिय
मेशुचितादिघनपेक्षणम् तदभावेशुचित्वादिनियमानामपेक्षणम् ॥ अतःकेचिन्महांतःशुचयस्स
नियमाःपूजांतेनाममंत्रंजपंतोदृश्यंते नैवान्यदाऽशुचितादशासु अतएवचवल्लभाचार्याणांम
तेशूद्राणांजलाहरणादिसेवायोग्यतायांमशुचित्वादिनिरासायप्रथमंसमंत्रतुलशीमालि
काकंठत्वंसंपाद्यतूष्णीं नामोपरिशंतिःतदुक्तंस्त्रीबालानांभाषणादिव्यवहारयोग्यतासि
ध्यर्थंअशुचित्वादिनिर्हारकंतदुक्तंकेवलंनामोपदिश्यपुनस्तेषांतदितरत्तदेववा नामदीक्षाले
नकुर्वंतिनैमित्तिकविनायकपूजनादौमीमांसकमतीयमंत्रस्येवदेवतात्वमभिप्रेत्यकर्ममात्रा
दावधिकृतत्वेननिर्विघ्नतासिध्यर्थेअंगत्वेनप्राप्तमादावेवैकंद्वितीयंविघ्नाधिराजपूजनमाव
श्यकत्वेनयथाकर्त्तव्यंभवति तद्वदिति·एवमधिकारसिद्धिंसंसाध्यपुनःकार्यनिर्वाहइतित्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षामभिप्रायः परेतु महाशयास्सार्वकालतयाऽतथाभूताःमालिकाहस्ताःरथ्यायां शयने याने भुक्ता
ववस्थितौ सदसिच यथाकथंचिदपि प्रायश्चित्तबुध्याविशेषतोजपंतोभवंति अत्रतु देवता
धिकरणप्राबल्याद्विग्रहयुक्देवतैक्ये यथाखादिराधिकरणे एकस्येवोभयार्थतया संयोग
एथक्त्वेननिर्वाहः तद्वत्राप्यशुचितानिर्हरणपूर्वकमिष्टसाधनताचेत्येतेषामविगृह्योयम
भिसंधिः अशनांगीयनैवेघवैश्वदेववत् इत्येवंरूपमुभयविधमप्युक्तभंग्याशास्त्रेणापिसि
द्धमित्यलमतिवृद्ध्या शिष्टव्यवहारापलापनेन अन्यच्च यथाराजसूयप्रकरणेचंद्रवरुणहरिश्चंद्रादिद्
ष्टांतेनान्यथात्वमभिधायतद्देवताऋषिभिस्सर्वज्ञैःश्रीकृष्णव्यासादिभिस्तन्निर्हृतिमुक्तापुन
स्संहारादिनातद्वैकल्यमनुपपन्नम् तत्फलकत्वात्तस्य सर्वज्ञत्व वैकल्ययोरन्योन्यापेक्ष
निर्हरण[illegible] सर्वज्ञत्व वैकल्यमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णोनासंभवात् वस्तुस्वभावेनतद्धर्मव्याघातादंगीकारेपिविधिवैय्यर्थ्यापातात् अनिष्ट
प्रवृत्यनुपपत्तेः एवमनुपपत्तौतरिछयेवमध्येशिशुपालवधादिनाप्रत्यक्षतयाब्रह्महत्यादिव
द्राजवधादिनाऽशुचित्वादंगवैकल्यं सूपपादम् तथैवरणंतेषुसंहारफलकत्वादिनासज्ञा
तीयतत्कल्पनातर्कोप्यूह्यः नयुज्यतेत्रान्यवधःप्रचोदितादिस्फुटेः अन्यवधः विधिस्फुटपश्चा
दिवधातिरेकेणेत्यर्थः कर्मणियेनकेनापिप्रकारेणेतिसुतरामत्रकेमुत्यध्वनिः आकस्मिकज
तुपातादीनामपिदोषश्रवणात् अतउक्तम् कर्मणोगहनागतिरिति गहना दुःसाध्या गतिः
प्राप्तिःसाकल्यं फलंच ननुतेषामेवासर्वज्ञत्वकल्पनेकर्तुंशक्यम् सकलशास्त्रशब्दांतभं
गापत्त्यासर्वोपप्लवप्रसंगात् अन्यच्च रुद्रदैवत्यकल्पनयातत्पूर्त्यैचसंतोषेणैवंतत्फलक
लेनसाकल्यमेवंदूषणगणानवसरैरितिमंतानरमप्युक्तानिरतादेवस्यान्नेवरसाल्लभितिनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसितव्यम् एवंसतिदर्शितैवदिगुपपन्नाभवतीति एवंभगवन्माहात्म्यात् तदिच्छयैवतत्क्षमीधर्मो
भवतोनान्यथा·औषधोग्निवदितरानपेक्षतोनैवपोषणरूपमाहात्म्यनिर्वचनादितिपौराणि
कानांहृद्यम् सुतरामतथाभूतानांहिविदंधराकर्णदिकपिराक्षसादीनामप्यनुग्रहदर्शनान्नकथ
मपिअधिकारापेक्षेतिसुष्ठुनिर्गलितम्·तथाचायंप्रघट्टकार्थः नियमानियमोभेदौवैपरीत्येन
तद्धजो एवंव्यवस्थाऽवस्थातोवचनानांतथैक्यता । श्रुतिस्मृतिपुराणस्थवाक्यानामत्रदर्शने·
ग्रंथविस्तरभीर्यस्मादश्रव्यंश्रीमतांभवेत् २ इतिकिंचित्समुद्दिष्टंसूत्रोक्तंसर्वसंग्रहात् एतदर्थ
प्रकाशेस्याद्यावच्छास्त्रसमागमः ३ सदानंदस्यजीवस्यस्वोत्कर्षव्यापनादिना तथावादितया
भ्रांत्याभ्रांतिरेवनिराकृता ४ दोषबुद्धिर्नकर्त्तव्यानवेसारार्थसंग्रहे नदुष्टोनूतनश्चंद्रोनिखिलैर्व
यतेहिसः ५ नामस्मरणमीमांसारामकृष्णप्रकाशिता सज्जनानांनिरीर्ष्यानांमुदेभवतुइत्यलम् ६ नेत्रेशवसु
चंद्ररेखेभिनेदेमासिचेश्वरे द्विशुक्लपूर्णायांग्रंथोयंपूर्णतामियात् ७ इतिश्रीरामकृष्णविरचितोनामस्मरण

KKSU LIBRARY
RAMTEK
441 106
M-1626
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.09.20 15:41
,TRANSFERRED=2020/09/23 at 15:44:01
,PAGES=12
,TYPE=STD
,NAME=S0003684
,Book Name=M-1626-NAMBHASHAMRAN BHIMANSA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
;

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection